इत्यत्र: पुंसाद्यस्तु प्रमदाः परिकीर्त्तिताः ॥
अल्पायुषि लघु छिन्ना दीर्घा छिन्ना महायुषि ।
शुभन्तु लक्षणं स्त्रीणां प्रोक्तं चाशुभमन्यथा ॥”
तासां अशुभलक्षणं यथा,—
“कनिष्ठिकानामिका वा यस्या न स्पृशते महीम् ।
अङ्गुष्ठं वा गता यस्यास्तर्ज्जनी कुलटा च सा ॥
उद्बद्धाभ्यां पिण्डिकाभ्यां जङ्घे चातिशिरालके ।
रोमशे चातिमांसे च कुम्भाकारं तथोदरम् ॥
वामावर्त्तं निम्नमल्पं दुःखितानाञ्च गुह्यकम् ।
ग्रीवया ह्रस्वया निःस्वा दीर्घया च कुलक्षयः ॥
पृथुलया प्रचण्डाश्च स्त्रियः स्युर्नात्र संशयः ।
केकरे पिङ्गले नेत्रे श्यावे लोलेक्षणासती ॥
स्मिते कूपे गण्डयोश्च या ध्रुवं व्यभिचारिणी ।
प्रलम्बिनि ललाटे च देवरं हन्ति चाङ्गना ॥
उदरे श्वशुरं हन्ति पतिं हन्ति स्फिचोर्द्वयोः ।
या तु रोमोत्तरौष्ठी स्यान्न शुभा भर्त्तुरेव हि ॥
स्तनौ सरोमावशुभौ कर्णौ च विषमौ तथा ।
करालविषमा दन्ताः क्लेशाय च भयाय च ॥
चौर्य्याय क्रव्यमांसाश्च दीर्घा भर्त्तुश्च मृत्यवे ।
क्रव्यादरूपैर्हस्तैश्च वृककाकादिसन्निभैः ॥
शिरालैर्विषमैः शुष्कैर्वित्तहीना भवन्ति हि ।
संयुक्तोत्तरोष्ठी या कलहे रूक्षकेशिनी ॥
स्त्रीषु दोषा विरूपाश्च यत्राकारो गुणास्ततः ॥”
इति गरुडपुराणम् ॥
(नाराचच्छन्दोविशेषः । इति छन्दोमञ्जरी ॥)

नारीकवचः, पुं, (नार्य्यः कवचः सन्नाह इव यस्य ।) सूर्य्यवंशीयमूलकराजः । स च अश्मकपुत्रः । सौदासपौत्रश्च । “योऽसौ निःक्षत्रे क्ष्मातलेऽस्मिन् क्रियमाणे स्त्रीभिर्विवस्त्राभिः परिवार्य्य रक्षितः । ततस्तं नारीकवचमुदाहरन्ति ।” इति विष्णुपुराणे । ४ । ४ । ३८ ॥

नारीकेलः, पुं, (किल क्रीडने+भावे घञ् । नार्य्या केल इव केलो सम्भोगो यत्र ।) नारिकेलः । इति शब्दरत्नावली ॥

नारीकेली, स्त्री, (नारीकेल+गौरादित्वात् ङीष् ।) नारिकेलः । इति शब्दरत्नावली ॥

नारीचं, क्ली, (नाडीच+डस्य लत्वम् ।) शाकविशेषः । नालिता इति भाषा ॥ तद्द्विविधं तिक्तं मधुरञ्च । तिक्तस्य गुणः । रक्तपित्तहरत्वम् । कृमिकुष्ठविनाशित्वञ्च । मधुरस्य गुणाः । पिच्छिलत्वम् । शीतलत्वम् । विष्टम्भिकफवातकारित्वञ्च । इति राजवल्लभः ॥

नारीतरङ्गकः, पुं, (नारीं तरङ्गयति चञ्चलचित्तां करोतीति । तरङ्ग+क्वौ णिच्+ण्वुल् ।) विटः । इति शब्दमाला ॥

नारीदूषणं, क्ली, (नारीणां दूषणम् ।) स्त्रीणां दोषः । स च षड्विधः । यथा,—
“पानं दुर्ज्जनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नोऽन्यगेहवासश्च नारीणां दूषणानि षट् ॥”
इति मनुः ॥

नारीष्टा, स्त्री, (नारीणां इष्टा प्रिया ।) मल्लिका । इति राजनिर्घण्टः ॥

नार्य्यङ्गः, पुं, (नार्य्या अङ्गमिव शोभनं अङ्गं यस्य ।) नागरङ्गः । इति शब्दरत्नावली ॥ (नार्य्या अङ्गे, क्ली ॥)

नालं, क्ली, (नलतीति । नल बन्धे+“ज्वलितिकसन्तेभ्यो णः ।” ३ । १ । १४० । इति णः ।) उत्पलादिदण्डः । तत्पर्य्यायः । नाला २ । इत्यमरः । २ । ६ । २२ ॥ नाली ३ नालिका ४ । इति भरतः ॥ (यथा, रघुः । ६ । १३ ।
“कश्चित् कराभ्यामुपगूढनाल-
मालोलपत्राभिहतद्विरेफम् ।
रजोभिरन्तःपरिवेषवन्धि
लीलारविन्दं भ्रमयाञ्चकार ॥”
अर्द्धर्चादित्वात् पुंलिङ्गोऽपि ॥) हरितालम् । इति स्वामी ॥ नले, पुं । इति राजनिर्घण्टः ॥

नालवंशः, पुं, (नाली वंश इव ।) नलः । इति राजनिर्घण्टः ॥

नाला, स्त्री, (नल बन्धे+णः । ततष्टाप् ।) नालम् । इत्यमरभरतौ ॥ डाँटा इति नाड़ा इति च भाषा । (नलति जलादिनिर्गच्छत्यनयेति । नल +करणे घञ् । जलनिर्गममार्गः । यथा, मार्कण्डेये । ३ । ४३ ।
“यथा तोयार्थिनस्तोयं यन्त्रनालादिभिः शनैः ।
आपिबेयुस्तथा वायुं पिबेद्योगी जितश्रमः ॥”)

नालिः, स्त्री, (नालयतीति । नल+णिच्+इन् ।) नाड़ी । शिरा । इति द्विरूपकोषः ॥

नालिकः, पुं, (नल एव नालस्तृणविशेषः । स भोक्तव्यत्वेनास्त्यस्येति ठन् ।) महिषः । इति त्रिकाण्डशेषः ॥ क्ली, (नालमस्त्यस्येति ।) पद्मम् । इति शब्दरत्नावली ॥ (नालः कार्य्यसाधनत्वेनास्त्यस्येति । नाल+“अत इनिठनौ ।” ५ । २ । ११५ । इति ठन् । अस्त्रविशेषः । तत्तु आकृतिकार्य्यादिना अधुनातनस्य ‘बन्दुक’ इति ख्यातस्य अस्त्रस्य सादृश्यं लभते । अस्य आकृत्यादिकन्तु शुक्रनीतौ उक्तम् । तद्यथा,—
“अस्त्रन्तु द्विविधं ज्ञेयं नालिकं मान्त्रिकं तथा ।
यदा तु मान्त्रिकं नास्ति नालिकं तत्र धारयेत् ॥
नालिकं द्विविधं ज्ञेयं बृहत्क्षुद्रप्रभेदतः ।
तिर्य्यगूर्द्ध्वच्छिद्रमूलं नालं पञ्चवितस्तिकम् ॥
मूलाग्रयोर्लक्ष्यभेदि तिलबिन्दुयुतं सदा ।
यन्त्राघाताग्निकृत् ग्रावचूर्णधृक् कर्णमूलकम् ॥
सुकाष्ठोपाङ्गबुध्नञ्च मध्याङ्गुलबिलान्तरम् ।
स्वान्तेऽग्निचूर्णसन्धातृ शलाकासंयुतं दृढम् ॥
लघुनालिकमप्येतत् प्रधार्य्यं पत्तिसादिभिः ।
यथा यथा तु त्वक्सारं यथा स्थूलविलान्तरम् ॥
यथा दीर्घं बृहत् गोलं दूरभेदि तथा तथा ।
मूलकीलभ्रमात् लक्ष्यसमसन्धानभाजि यत् ॥
बृहन्नालिकसंज्ञन्तत् काष्ठबुध्नविवर्ज्जितम् ।
प्रवाह्यं शकटाद्यैस्तु सुयुक्तं विजयप्रदम् ॥”
अस्य कार्य्यं यथा,—
“नालास्त्रं शोधयेदादौ दद्यात्तत्राग्निचूर्णकम् ।
निवेशयेत्तु दण्डेन नालमूले यथादृढम् ॥
ततः सुगोलकं दद्यात् ततः कर्णेऽग्निचूर्णकम् ।
कर्णचूर्णाग्निदानेन गोलं लक्ष्ये निपातयेत् ॥
लक्ष्यभेदी यथा बाणो धनुर्ज्याविनियोजितः ।
भवेत्तथा तु सन्धाय————————॥”)

नालिका, स्त्री, (नाला एव । स्वार्थे कन् । टापि अत इत्वम् ।) नाला । इति शब्दरत्नावली ॥ नालिताशाकः । इति शब्दमाला ॥ (यथा, सुश्रुते । १ । ४६ ।
“वातलं नालिकाशाकं पित्तघ्नं मधुरञ्च तत् ॥”) चर्म्मकषा । इति जटाधरः ॥ हस्तिकर्णवेधनिका । इति हारावली । ३० ॥ (यथा, माघे । १७।३५।
“गजाः सकृत्करतललोलनालिका
हता मुहुः प्रणदितघण्टमाययुः ॥”)

नालिकेरः, पुं, (नारिकेलः । रलयोरैक्यात् रस्य लः । लस्य रश्च ।) नारिकेलः । इत्यमरटीकायां रमानाथः ॥ (क्वचित् क्लीवेऽपि दृश्यते । यथास्य गुणाः ।
“नालिकेरं सुमधुरं गुर्व्वाध्मानञ्च शीतलम् ।
हृद्यं संहननं बस्तिशोधनं रक्तपित्तनुत् ॥
विष्टम्भि पक्वं मतिमत्पक्वं कफवातलम् ।
बृंहणं शीतलं वृष्यं नालिकेरफलं विदुः ॥”
इति हारीते प्रथमे स्थाने दशमेऽध्याये ॥
अस्य तोयगुणा यथा,—
“नालिकेरोदकं स्निग्धं स्वादु वृष्यं हिमं लघु ।
तृष्णापित्तानिलहरं दीपनं बस्तिशोधनम् ॥”
इति वाभटे सूत्रस्थाने पञ्चमेऽध्याये ॥)

नालिजङ्घः, पुं, द्रोणकाकः । इति हारावली ।८४॥

नालिता, स्त्री, (नालमिता प्राप्ता ।) स्वनामख्यातशाकः । यथा,—
“नालिता पट्टशाकश्च मिश्रपञ्चे तु नालिका ।”
इति शब्दमाला ॥
अस्य गुणाः नारीचशब्दे द्रष्टव्याः ॥

नाली, स्त्री, (नालि+वा ङीष् ।) शाककदम्बकः । डाँटा इति भाषा । इति मेदिनी । ले, २८ ॥ हस्तिकर्णवेधनी । घटी । इति त्रिकाण्डशेषः ॥ नाड़ी । इत्यमरटीकायां भरतः ॥ (यथा,—
“रसवाहिनीश्च नालीर्जिह्वामूलगलतालुक्लोम्नः । संशोष्य तृष्णा देहे कुरुतस्तृष्णां महाबलावेतौ । पीतं पीतं हि जलं शोषयतस्तमतो न याति शमम् ॥”
इति चरके चिकित्सास्थाने चतुर्विंशेऽध्याये ॥)
पद्मम् । इति शब्दरत्नावली ॥

नालीकः, पुं, (नाल्या नलयन्त्रात् कायति शब्दायते इति । कै+कः । घोरशब्देन निर्गमनादेवास्य तथात्वम् ।) शरः । (यथा, महाभारते । ३ । ३१०।१७ ।
“कर्णिनालीकनाराचांस्तुदन्तो महारथाः ।
नाविध्यन् पाण्डवास्तत्र पश्यन्तो ह्यङ्गमन्तिकात् ॥”
तथा च शार्ङ्गधरसंगृहीतधनुर्व्वेदे ।
“नालीका लघवो बाणा नलयन्त्रेण नोदिताः ।
अत्युच्चदूरपातेषु दुर्गयुद्धेषु ते मताः ॥”)